শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্ভগৱদ্গীতাসূপনিষৎসু ব্রহ্মৱিদ্যাযাং যোগশাস্ত্রে

শ্রীকৃষ্ণার্জুনসংৱাদে

# ॥ রাজৱিদ্যারাজগুহ্যযোগো নাম নৱমোঽধ্যাযঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ রাজৱিদ্যারাজগুহ্যযোগো নাম নৱমোঽধ্যাযঃ ॥

শ্রীভগৱানুৱাচ
ইদং তু তে গুহ্যতমং প্রৱক্ষ্যাম্যনসূযৱে।
জ্ঞানং ৱিজ্ঞানসহিতং যজ্জ্ঞাত্ৱা মোক্ষ্যসেঽশুভাৎ॥ **9.1** ॥

রাজৱিদ্যা রাজগুহ্যং পৱিত্রমিদমুত্তমম্।
প্রত্যক্ষাৱগমং ধর্ম্যং সুসুখং কর্তুমৱ্যযম্॥ **9.2** ॥

অশ্রদ্দধানাঃ পুরুষা ধর্মস্যাস্য পরন্তপ।
অপ্রাপ্য মাং নিৱর্তন্তে মৃত্যুসংসারৱর্ত্মনি॥ **9.3** ॥

মযা ততমিদং সর্ৱং জগদৱ্যক্তমূর্তিনা।
মৎস্থানি সর্ৱভূতানি ন চাহং তেষ্ৱৱস্থিতঃ॥ **9.4** ॥

ন চ মৎস্থানি ভূতানি পশ্য মে যোগমৈশ্ৱরম্।
ভূতভৃন্ন চ ভূতস্থো মমাত্মা ভূতভাৱনঃ॥ **9.5** ॥

যথাকাশস্থিতো নিত্যং ৱাযুঃ সর্ৱত্রগো মহান্।
তথা সর্ৱাণি ভূতানি মৎস্থানীত্যুপধারয॥ **9.6** ॥

সর্ৱভূতানি কৌন্তেয প্রকৃতিং যান্তি মামিকাম্।
কল্পক্ষযে পুনস্তানি কল্পাদৌ ৱিসৃজাম্যহম্॥ **9.7** ॥

প্রকৃতিং স্ৱামৱষ্টভ্য ৱিসৃজামি পুনঃ পুনঃ।
ভূতগ্রামমিমং কৃৎস্নমৱশং প্রকৃতের্ৱশাৎ॥ **9.8** ॥

ন চ মাং তানি কর্মাণি নিবধ্নন্তি ধনঞ্জয।
উদাসীনৱদাসীনমসক্তং তেষু কর্মসু॥ **9.9**॥

মযাধ্যক্ষেণ প্রকৃতিঃ সূযতে সচরাচরম্।
হেতুনানেন কৌন্তেয জগদ্বিপরিৱর্ততে॥ **9.10**॥

অৱজানন্তি মাং মূঢা মানুষীং তনুমাশ্রিতম্।
পরং ভাৱমজানন্তো মম ভূতমহেশ্ৱরম্॥ **9.11**॥

মোঘাশা মোঘকর্মাণো মোঘজ্ঞানা ৱিচেতসঃ।
রাক্ষসীমাসুরীং চৈৱ প্রকৃতিং মোহিনীং শ্রিতাঃ॥ **9.12**॥

মহাত্মানস্তু মাং পার্থ দৈৱীং প্রকৃতিমাশ্রিতাঃ।
ভজন্ত্যনন্যমনসো জ্ঞাৎৱা ভূতাদিমৱ্যযম্॥ **9.13**॥

সততং কীর্তযন্তো মাং যতন্তশ্চ দৃঢৱ্রতাঃ।
নমস্যন্তশ্চ মাং ভক্ত্যা নিত্যযুক্তা উপাসতে॥ **9.14**॥

জ্ঞানযজ্ঞেন চাপ্যন্যে যজন্তো মামুপাসতে।
একৎৱেন পৃথক্ত্বেন বহুধা ৱিশ্ৱতোমুখম্॥ **9.15**॥

অহং ক্রতুরহং যজ্ঞঃ স্ৱধাহমহমৌষধম্।
মন্ত্রোঽহমহমেৱাজ্যমহমগ্নিরহং হুতম্॥ **9.16**॥

পিতাহমস্য জগতো মাতা ধাতা পিতামহঃ।
ৱেদ্যং পৱিত্রমোঙ্কার ঋক্সাম যজুরেৱ চ॥ **9.17**॥

গতির্ভর্তা প্রভুঃ সাক্ষী নিৱাসঃ শরণং সুহৃৎ।
প্রভৱঃ প্রলযঃ স্থানং নিধানং বীজমৱ্যযম্॥ **9.18**॥

তপাম্যহমহং ৱর্ষং নিগৃহ্ণাম্যুৎসৃজামি চ।
অমৃতং চৈৱ মৃত্যুশ্চ সদসচ্চাহমর্জুন॥ **9.19**॥

ত্রৈৱিদ্যা মাং সোমপাঃ পূতপাপা
যজ্ঞৈরিষ্টৱা স্বর্গতিং প্রার্থযন্তে।
তে পুণ্যমাসাদ্য সুরেন্দ্রলোকং
অশ্নন্তি দিৱ্যান্দিৱি দেৱভোগান্॥ **9.20** ॥

তে তং ভুকত্বা স্বর্গলোকং ৱিশালং
ক্ষীণে পুণ্যে মর্ত্যলোকং ৱিশন্তি।
এৱং ত্রযীধর্মমনুপ্রপন্না
গতাগতং কামকামা লভন্তে॥ **9.21** ॥

অনন্যাশ্চিন্তযন্তো মাং যে জনাঃ পর্যুপাসতে।
তেষাং নিত্যাভিযুক্তানাং যোগক্ষেমং ৱহাম্যহম্॥ **9.22** ॥

যেঽপ্যন্যদেৱতাভক্তা যজন্তে শ্রদ্ধযান্ৱিতাঃ।
তেঽপি মামেৱ কৌন্তেয যজন্ত্যৱিধিপূর্ৱকম্॥ **9.23** ॥

অহং হি সর্ৱযজ্ঞানাং ভোক্তা চ প্রভুরেৱ চ।
ন তু মামভিজানন্তি তত্ত্বেনাতশ্চ্যৱন্তি তে॥ **9.24** ॥

যান্তি দেৱব্রতা দেৱান্পিতৄন্যান্তি পিতৃব্রতাঃ।
ভূতানি যান্তি ভূতেজ্যা যান্তি মদ্যাজিনোঽপি মাম্॥ **9.25** ॥

পত্রং পুষ্পং ফলং তোযং যো মে ভক্ত্যা প্রযচ্ছতি।
তদহং ভক্ত্যুপহৃতমশ্নামি প্রযতাত্মনঃ॥ **9.26** ॥

যৎকরোষি যদশ্নাসি যজ্জুহোষি দদাসি যৎ।
যত্তপস্যসি কৌন্তেয তৎকুরুষ্ৱ মদর্পণম্॥ **9.27** ॥

শুভাশুভফলৈরেৱং মোক্ষ্যসে কর্মবন্ধনৈঃ।
সন্ন্যাসযোগযুক্তাত্মা ৱিমুক্তো মামুপৈষ্যসি॥ **9.28** ॥

সমোঽহং সর্ৱভূতেষু ন মে দ্ৱেষ্যোঽস্তি ন প্রিযঃ।
যে ভজন্তি তু মাং ভক্ত্যা মযি তে তেষু চাপ্যহম্॥ **9.29** ॥

অপি চেৎসুদুরাচারো ভজতে মামনন্যভাক্।
সাধুরেৱ স মন্তৱ্যঃ সম্যগ্ব্যৱসিতো হি সঃ॥ **9.30** ॥

ক্ষিপ্রং ভৱতি ধর্মাত্মা শশ্ৱচ্ছান্তিং নিগচ্ছতি।
কৌন্তেয প্রতিজানীহি ন মে ভক্তঃ প্রণশ্যতি॥ **9.31** ॥

মাং হি পার্থ ৱ্যপাশ্রিত্য যেঽপি স্যুঃ পাপযোনযঃ।
স্ত্রিযো ৱৈশ্যাস্তথা শূদ্রাস্তেঽপি যান্তি পরাং গতিম্॥ **9.32** ॥

কিং পুনর্ব্রাহ্মণাঃ পুণ্যা ভক্তা রাজর্ষযস্তথা।
অনিত্যমসুখং লোকমিমং প্রাপ্য ভজস্ৱ মাম্॥ **9.33** ॥

মন্মনা ভৱ মদ্ভক্তো মদ্যাজী মাং নমস্কুরু।
মামেৱৈষ্যসি যুক্ত্ৱৈৱমাত্মানং মৎপরাযণঃ॥ **9.34** ॥

॥ ইতি শ্রীমদ্ভগৱদ্গীতাসূপনিষৎসু ব্রহ্মৱিদ্যাযাং যোগশাস্ত্রে
শ্রীকৃষ্ণার্জুনসংৱাদে রাজৱিদ্যারাজগুহ্যযোগো নাম নৱমোঽধ্যাযঃ ॥